National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 229-234
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Awasthi Sailesh Kumar**
Asst. Professor Grade,
Dept. of Education,
Central Sanskrit University,
New Delhi

Correspondence:
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade,
Dept. of Education,
Central Sanskrit University,
New Delhi

# भारतीयज्ञानपरम्परायां संस्कृतस्य संस्कृतसंवर्धनसंस्थानां च भूमिका

## (Role of Sanskrit and Sanskrit Promotion Organizations in Indian Knowledge System)

**डॉ. अवस्थीशैलेशकुमारः**

**★ सारांशः -**

भारतदेशस्य ज्ञानपरम्परा हि सहस्रवर्षेभ्यः अपि पुरातनी वैज्ञानिकी च इति विदुषां मतम्। तस्यामेव ज्ञानपरम्परायां वेदाः, पुराणानि, उपनिषदः, स्मृतिग्रन्थाश्च अन्तर्भवन्ति। मध्यकाले जातः कश्चन **सांस्कृतिकवैचारिक**विच्छेदः भारतीयान् तस्याः परम्परायाः दूरं नीत्वा पाश्चात्य संस्कृतेः परम्परायाः पालने प्रेरितान् अकरोत्। योगः, आयुर्वेदः, वेदान्तः, व्याकरणं, साहित्यं, ज्योतिषम् इत्यादि शास्त्राणाम् उपयोगितायाः ज्ञानं सर्वविदितमेव। एतेषां शास्त्राणां सर्वेपि ग्रन्थाः अमूल्यनिधिः वर्तन्ते, ये च अस्मभ्यं मार्गदर्शनं प्रयच्छन्ति। एतदतिरिच्य संस्कृतं याः प्रवृत्तीः पोषयति, ताः विनापूर्वाग्रहं लोककल्याणाय प्रयतन्ते। सृष्टिसंवर्धनकेंद्रिता वैश्विकदृष्टिः, प्रकृत्या सह सततसामञ्जस्यं, मनुष्यस्य स्वभावे उदात्ततां, चैतन्यविस्तारः, पुरुषार्थं तथा सृजनात्मकता, परिष्कारस्य सतताकांक्षा यथा संस्कृतरचनासु अभिव्यक्ता वर्तते तथा अन्यत्र उदाहरणानि दुर्लभानि भवन्ति। वैचारिकसहिष्णुतायाः संस्कृतसमृद्धेः विद्वत्तापरिपूर्णपरम्परायाश्च निरन्तरप्रवाहः पोषणञ्च संस्कृताद् ऋते नान्यत्र दृश्यते।

यदि पश्यामः चेत् सम्पूर्णमानवसभ्यताम् अग्रे नेतुं सक्षमया संस्कृतभाषया नैकानि योगदानानि कृतानि। वैश्विकदृष्टेः आवश्यकतायां सत्यां संस्कृतं सूत्ररूपेण ज्ञानपरम्परारक्षणे प्रमुखपात्रं वहति। तेषु योगदानेषु एव संस्कृतसंवर्धने प्रयतमानाः भारतीयज्ञानपरम्परायाः अनुपालनरताः संस्थाः महत्त्वपूर्णस्थानं वहन्ति। तासां सर्वकारेकरसंस्थानां विषये पत्रेस्मिन् विवरणं दातुं प्रयत्नः क्रियते।

**★ विशेषसंसूचकानि** - संस्कृतसंवर्धनं, भारतीयज्ञानपरम्परा, शास्त्रसंरक्षणम्।

### ❖ भारतीयज्ञानपरम्परा -

भारतीयज्ञानपरम्परायां यथा विषयाः भवन्ति तेषां वास्तविकजीवने महद्योगदानं भवति। एतावन्तः विषयाः विद्या तथा शिल्पकला रूपेण स्थिताः। भारतीयनुशासनात्मकसंरचनासु दर्शनरूपेण विविधक्षेत्राणि अन्तर्भवन्ति। यथा - वास्तुकला, व्याकरणं, गणितं, खगोलविज्ञानं, समाजशास्त्रं, धर्मशास्त्रम्, अर्थशास्त्रं तथा राजनैतिकशास्त्रं नैतिकतामूल्यानि, भूगोलं, तर्कशास्त्रं, सैन्यविज्ञानं, शस्त्रविज्ञानं, कृषिः, व्यावसायिकशास्त्रं, धातुविज्ञानं, विमानशास्त्रं, चिकित्साशास्त्रं, कविता, जीवविज्ञानं, पशुचिकित्साविज्ञानम् इत्यादयः सन्ति। प्रत्येकस्मिन् शास्त्रे संचितग्रन्थसमूहः एव प्राप्यते।

ज्ञानपरम्परायां 18 प्रमुखविद्याः, सैद्धान्तिकविषयाः 64 कलाः च सन्ति। 18 अष्टादशविद्याः चत्वारोवेदाः, उपवेदाः, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं षट् वेदांगानि, कर्मकांडं तथा भाषाशास्त्रम् इति।

शिल्पकलानां शिक्षणं भवति स्म अधुनापि क्रियते च। कश्चनशिक्षकः आवश्यकः भवति यश्च अभ्यासं

कारयेत् ततः परमेव पूर्णरूपेण छात्रः शिल्पकलाम् अभ्यसितुं योग्यः भवति। नृत्यकलायाः अपि पृथगेव महत्त्वं भवति यच्च अद्यापि भारतीयनृत्यं, संगीतं वैश्विकस्तरे प्रसिद्धमस्ति।

संस्कृतं केवलं भाषा न। तत् किञ्चन जीवनदर्शनम्। यच्च दर्शनं वदति एकं सत् विप्राः बहुधा वदन्ति इति, यच्च दर्शनं वदति – आ नो भद्राः क्रतवो यन्तु विश्वतः इति, यच्च दर्शनं वदति – कृण्वन्तो विश्वमार्यम् इति, यच्च दर्शनं वदति – स्वदेशो भुवनत्रयम् इति, तद् संस्कृतदर्शनं बोधयति – सङ्गच्छध्वं संवदध्वं संवो मनांसि जानताम् इति। तद् संस्कृतदर्शनं शिक्षयति – आत्मवत् सर्वभूतेषु इति। एतादृशं वैश्विकं चिन्तनं, भावैक्यपूर्णं, सामरस्ययुक्तं, सर्वभूतहितचिन्तकं, सर्वसमावेशकं च जीवनदर्शनम् एव जातिमतसम्प्रदायैः विभक्तं परस्परसंघर्षरतं विश्वं पुनः एकीकर्तुं शक्नोति। सर्वसमावेशकचिन्तनं संस्कृतस्य किञ्चन अपूर्वं वैशिष्ट्यम्। संस्कृतस्य संस्कृतिः नाम सर्वसमावेशिका संस्कृतिः। कुटुम्बे यथा परस्परं प्रीतिः, विश्वासः, सामरस्यं, पारस्परिकता, पूरकता च भवन्ति तथैव विश्वकुटुम्बे अपि विविधदेशानां मध्ये, विविधसमाजानां मध्ये, विविधमतसम्प्रदायानां मध्ये च समन्वयः सामरस्यं च अपेक्षितम्। अतः अद्य तदर्थम् उत्कृष्टसाधनभूतस्य संस्कृतस्य महत्तरा आवश्यकता अस्ति।

जलं यावद् मुख्यं तावदेव मुख्यं जलस्य स्थापनाय, आनयनाय, रक्षणाय वा उपयुज्यमानं पात्रम् अपि। जलं मुख्यम् उत पात्रम् इति पृष्टे सति कथ्यते – उभयमपि समानतया मुख्यम् इति। तथैव संस्कृतभाषायाः पाठनम् उत संस्कृतभाषायां विद्यमानानां विषयाणां पाठनम् इति प्रश्ने कृते, उत्तरं तु – भाषा विषयः चेति उभयमपि इति। परम् इदानीं सर्वेषां संस्कृतज्ञानां केवले विषये एव अवधानम् अस्ति, न तु भाषायाम्। एतद् न उचितम्। भाषाया अपि अभ्यासः कारणीयः। भाषायाः प्रयोगस्य अभ्यासः कारणीयः, येन सर्वे संस्कृतच्छात्राः, सर्वे अध्यापकाः च संस्कृतेन भाषणे लेखने च समर्थाः भवेयुः। संस्कृतभाषां के अत्यजन्? सामाजिकाः उत संस्कृतज्ञाः? न्यूनातिन्यूनं संस्कृत-विद्यालयेषु संस्कृतविभागेषु च संस्कृतं भवेत्। संस्कृतसम्मेलनेषु संस्कृतं भवेत्। न्यूनातिन्यूनं संस्कृतज्ञानां परस्परसम्पर्कभाषा संस्कृतं भवेत्। संस्कृतज्ञानां मुखेषु संस्कृतं भवेत्। विश्वसंस्कृतसम्मेलने संस्कृतं भवेत्।

## ❖ भाषात्वेन संस्कृतम्

भाषापाठनं नाम व्याकरणनियमानां पाठनम्, अनुवादक्रमपाठनं वा न। अपि तु श्रवण-सम्भाषणयोः अभ्यासः। एतादृशस्य प्रत्यक्षभाषा-शिक्षणस्य निमित्तं प्रयत्नः विधेयः। अष्टादशविद्यास्थानानि, चतुः षष्टिकलाः, चत्वारः वेदाः, शताधिकाः उपनिषदः, षड् उपवेदाः, षड् वेदाङ्गानि, अष्टादश पुराणानि, वैदिकदर्शनं, जैनदर्शनं, बौद्धदर्शनं, इतिहासकाव्यनाट्यशास्त्रादयः इत्येतादृशस्य असीमस्य संस्कृतज्ञानमहोदधेः मथनं कृत्वा नूतनभविष्यनिर्माणं करणीयं भवति। संस्कृतं न केवलं प्राचीनभाषा, अपि तु आधुनिकभाषा अपि। भाषारूपेण, अभिव्यक्तेः माध्यमरूपेण, साहित्यमनोरञ्जन-दर्शन-वैद्यकीयविज्ञान-शिक्षादीनां माध्यमरूपेण च अनादिकालतः अद्यावधि संस्कृतस्य अविच्छिन्नपरम्परा वर्तते। इदानीं वर्तमानकाले भाषणशील-सङ्गणकनिर्माणाय, विविधभाषाणां परम्परानुवादाय यन्त्रानुवादतन्त्रांशनिर्माणाय, सैबरसेक्युरिटिक्षेत्रसम्बन्धे इत्येवं बहुषु ज्ञानक्षेत्रेषु संस्कृतस्य महत्तमा भूमिका भवेत् इति वैज्ञानिकानां मतम्। संस्कृतस्य प्रशंसा, महिमावर्णनमात्रं च न पर्याप्तम्। संस्कृत्य विकासाय किं किं करणीयम् इत्यत्र सर्वैः संस्कृतज्ञैः चिन्तनीयम्। संस्कृतस्य पाठनविधिः आकर्षिका भवेत्। आधुनिकविषयैः सह संस्कृतशिक्षणस्य गुणस्तः वर्धनीयः। संस्कृते शोधकार्यम् इतोऽपि अधिकं लोकोपयोगि भवेत्। आदुनिकविषयैः सह संस्कृतस्य योजनं, समकालिक-साहित्यनिर्माणं, संस्कृतग्रन्थानां वैज्ञानिकदृष्ट्या अध्ययनम् इत्यादीनि कार्याणि संस्कृतज्ञैः एव करणीयानि भवन्ति। अतः संस्कृतार्थं करणीयानां कार्याणाम् आद्यतानिश्चयः प्रथमं कर्तव्यः।

संस्कृतपरम्परा गङ्गया समाना। गङ्गा गोमुखतः आरभ्य गङ्गासागरपर्यन्तं सर्वत्र पवित्रा तिष्ठति। मार्गे आत्मना सह संयुक्तां सर्वामपि नदीं सा पवित्रीकरोति। सा नदी अपि गङ्गात्वं प्राप्नोति। संस्कृतगङ्गा अपि तथैव। स्वयं पवित्रा सा यत्र यत्र गच्छति तत्र तत्र सर्वत्र पवित्रतां प्रसारयति। अतः संस्कृतगङ्गा विश्वे सर्वत्र प्रवाहिता भवेत्, अपि च सर्वेषां जनानां मनांसि निर्मलानि कृत्वा विश्वमखिलं पवित्रं कुर्यात्। भवन्तः संस्कृतज्ञाः तु नित्यमेव संस्कृतगङ्गास्नानं कुर्वन्ति। भाग्यवन्तः खलु भवन्तः। संस्कृतभाषा विश्वभाषा वर्तते। योगस्य अनुयायिनः विश्वे सप्तसप्तत्यधिकैकशतेषु देशेषु सन्ति। तेषु बहवः इदीं संस्कृतपठनम् आरब्धवन्तः। अतः अद्य संस्कृतं अत्यन्तं वेगेन प्रसरत् अस्ति, वर्धमानं च अस्ति।

**संस्कृतभारती न केवलं भारते देशे, अपि तु बहुषु देशेषु संस्कृतसम्भाषणशिबिराणां माध्यमेन संस्कृतस्य प्रचुरं प्रचारं कुर्वती अस्ति। विशेषतः अमेरिकादेशे संस्कृतभारती विद्यालयच्छात्राणां कृते विदेशभाषारूपेण संस्कृतपाठनस्य व्यवस्थां कृत्वा विनूतनम् उपक्रमम् आरब्धवती। संस्कृतभारत्याः अयं प्रयासः अत्यन्तं स्तुत्यः।**

भारतीयानां कृते संस्कृतस्य महत्त्वं प्राचीनकाले तु आसीदेव वर्त्तमानकालेऽपि तस्य विविधं महत्वं विद्यते- १.साहित्यिकं महत्वम्, २.सांस्कृतिकं महत्त्वम्, ३.आध्यात्मिकं महत्त्वम्, ४.नैतिक महत्वम्, ५.व्यावसायिकं महत्त्वम्, ६.भाषावैज्ञानिकं महत्त्वम्, ७.आनुसन्धानिकं महत्वम्। एतादृशस्य महत्त्वपूर्णस्य संस्कृतस्य प्रासंगिकता सर्वदा सर्वत्र सर्वकालेषु भवति भविष्यति च। अतः अस्याध्ययनस्य आवश्यकताऽपि नितरां विद्यते। एवं हि यदि संस्कृतं विना भारतीयसंस्कृतेः, भारतीयजीवनदर्शनस्य, भारतीयशिक्षायाः वा कल्पना दुष्करा तर्हि कथं तस्याध्ययने उपेक्षा क्रियते? संस्कृताध्य-यनार्थं क्रमबद्धयोजनया भवितव्यम्।

यदा संस्कृताध्ययनस्य चर्चा भवति, तद्गतसमग्रस्य साहित्यस्य परिकल्पना क्रियते। संस्कृतभाषा पृथक् संस्कृतसाहित्यं च पृथक् इति न चिन्तयामः। अतएव संस्कृताध्ययने काठिन्यमनुभूयते संस्कृते सम्भाषणस्य अभावश्च दृश्यते। अत उभयोः पृथक् पृथक् विकासस्य अध्यापनस्य, प्रचारस्य वा योजना करणीया।भाषारूपेण संस्कृताध्यापनम्

भाषारूपेण संस्कृतं कथं वा पाठनीयम् ? कति भाषाः पाठनीयाः ? इत्यादयः प्रश्नाः उद्यन्ति बहुभाषाभाषिभारते द्विभाषासूत्रम्, त्रिभाषासूत्रम् इति वा वचनम् असंगतमस्ति। भाषाः चतस्रः, पञ्च तदधिका वा भवितुमर्हन्ति, यावदधिकाः भाषाः ज्ञायन्ते तावदधिका परस्परमैत्री भारतीयेषु भवितुमर्हति। तथापि भाषाणां वैशिष्ट्यक्रमेण विचारयामः -

१. सांस्कृतिकभाषा (संस्कृतम्) Cultural language

२. राष्ट्रभाषा (हिन्दी) National language

३. मातृभाषा (प्रान्तीयभाषा) Mother tounge

४. अन्ताराष्ट्रियभाषा (आंग्लम्) International language

एतासां चतसृणां भाषाणामध्ययनम् भारते अपेक्षितम् हिन्दीभाषिक्षेत्रे तृतीयभाषारूपेण या कापि आधुनिकभारतीया भाषा (विशिष्य दक्षिणभारतीया भवितुमर्हति) एतासु [क] द्वे भाषे प्रमुखभाषारूपेण (Main languages) [ख] द्वे भाषे च गौणभाषारूपेण ( Subsidiary languages) स्युः।

का भाषा प्रामुख्येन पठनीया का च गौणत्वेनेति निर्णयः छात्राणामिच्छया भवेत् । चतुसृष्वपि भाषासु पाठ्यक्रमस्य निर्माणं तादृशं भवेत् येन छात्राः स्वेच्छया प्रमुखभाषयोः सम्पूर्णाशयोः शताङ्कयोः अध्ययनं कुर्युः तथा गौणभाषयोः अर्धांशयोः पञ्चाशदङ्कयोः अध्ययनं कुर्युः। पुनश्च यदा भाषारूपेण संस्कृतं पाठ्यते तदा अन्यभाषाः इव अत्रापि सरलव्याकरणस्य वाक्यरचनायाः, विविधशब्दप्रयोगाणां, संरचनानां इत्यादीतनां शिक्षणं भवेत् । सरलसंस्कृतसम्भाषण- स्यापि अभ्यास: भवेत्। एतदर्थं वेङ्गलूरस्य हिन्दुसेवाप्रतिष्ठानस्य संस्कृतविभागेन पुरीस्थ लोकभाषाप्रचारसमित्या, देशे अन्यान्यसंस्कृतप्रचारकसमितिभिः संचाल्यमाना: सरलसस्कृतशिक्षणपाठ्यक्रमा: निदर्शनरूपेण भवितु-मर्हन्ति। विद्यालयपाठ्यक्रमेष्वपि संस्कृतभाषायाः शिक्षणार्थं तादृशी प्रणाली अवलम्बनीया।

❖ **संस्कृतसंवर्धनसंस्थाः -**

भारतीयज्ञानपरम्परायां विद्यमानशास्त्राणां विद्यानां, कलानाञ्च संरक्षणार्थं, संवर्धनार्थं, शिक्षणार्थं च आबहोः कालात् देशस्य भिन्नकोणेभ्यः सामान्यजनैः साहाय्यं स्वीकृत्य संस्कृतसंवर्धनसंस्थाभिः संस्कृतसंस्कृतिसंस्काराणां पोषणं क्रियमाणं वर्तते। सम्प्रति भारतदेशे शताधिकाः संस्थाः संस्कृतसंवर्धने रतास्सन्ति। तासां संस्थानां कार्यकरणशैली, प्रचारप्रसारोपायाः, गतिविधयश्च उत्कृष्टाः वैज्ञानिकाश्च सन्ति।

**. संस्कृतसंजीवनसमाजः, पटना, बिहारराज्यम्**

संस्थेऽयं संस्कृतप्रचारप्रसाराय च प्रयतते। अस्या प्रथमसम्मेलनं (बैठक) 5 एप्रिल् 1887 तमे संवत्सरे जातम्। तस्मिन् सम्मेलने अध्यक्षपदं पोप जोन् बेंजमिन् महोदयः निरूढवान् यत्र देशविदेशेभ्यः जनाः समागता आसन्। संस्थायाः प्रप्रथमसचिवत्त्वेन अम्बिकादत्त व्यासमहोदयः पदमलङ्कृतवान्। 1940 संवत्सरे अनया संस्थया "संस्कृतसञ्जीवनम्" इति त्रैमासिकपत्रिका प्रकाशिता। ततः परं पत्रिकायाः द्वाविंशे वर्षे 1962 संवत्सरे इयमेव मासिकपत्रिकात्त्वेन प्रकाशङ्गता यच्च जून् मासस्य अङ्के इत्थं पुष्टीक्रियते –

**2. आर्षविद्याविकासकेन्द्रम्**

सहस्राधिकअर्शविद्याशिक्षकाणां जालपुटानां संपर्क-विवरणं, गतिविधीनां, परियोजनानां, सद्यस्कमाध्यमेन विश्वे सर्वत्र अद्वैत वेदान्तशिक्षणस्य उपलब्धये स्वामिवर्यैः अथवा तेषां प्रत्यक्ष शिष्यैः परम्परायाः संरक्षणार्थं बह्वीषु भाषासु अध्याप्यते।

इदं आभासीय केन्द्रं तेषां संशस्य चिह्नं भवति यत्र भगवत्पादाः आदिशंकराचार्याः तथा तत्कालगुरवः श्रीस्वामी दयानंद सरस्वतीवर्याणां माध्यमेन प्राप्तेयं गौरवशालिनी परम्परायाः अनुवर्तनाय पारंपरिक शिक्षण पद्धतेः चिह्नस्वरूपः अर्श संप्रदायः इति नाम्ना व्यवहृतः।

पूज्य स्वामिवर्यैः आरब्धाः काश्चन प्रमुख गतिविधयः -

- वेदानां आगमानाञ्च संरक्षणार्थं पाठशालाः।
- मंदिराणां परम्परा तथा संस्कृतीनां संरक्षणम्।
- शिक्षायै महत्त्वम्।
- दयानंद एजुकेशन ट्रस्ट माध्यमेन षट्सहस्राधिक छात्रेभ्यः एक-स्मिन् ग्रामे किंडरगार्टन तः पीएचडी पर्यन्तं व्यवस्थां कल्पयति।
- वैदिकपरम्परायाः शिक्षण कार्यक्रमः।
- कला संगीतस्य च संरक्षणम्।
- अर्श कला भूषणं पुरस्कार संस्थानम्।

**3. स्वामीब्रह्मानन्दसंस्कृतप्रबोधिनी -**

"तपोभूमिः" पोंडामण्डले कुंडिमजनपदे स्थितं गोवाराज्यस्य प्रसिद्धाध्यात्मिककेंद्रं "श्रीदत्तपद्मनाभपीठं" धर्मभूषण-सद्गुरुः ब्रह्मेशा-नंदाचार्य स्वामिनां निरंतरप्रयासैः सुप्रतिष्ठितं वर्तते।

श्रीदत्तपद्मनाभपीठं गत 150 वर्षेभ्यः सम्पूर्णविश्वे ज्ञानं, भक्तिः सत्कार्याणि वैदिकधर्मस्थापनायां निष्ठा, आत्मसाक्षात्कारप्राप्तिश्च इत्यादि विषयेषु निरतं वर्तते।

समाजाय पीठस्य योगदानं पूज्यसद्गुरुः पद्मनाभाचार्य स्वामिनां सान्निध्ये अभवत्। गोवायां, सद्गुरुसदानंदाचार्य स्वामिभिः "सुशेनदत्तमंदिरं" संस्थाप्य दिव्यकार्याणां बीजवपनं कृतम्। सद्गुरुब्रह्मानंदाचार्यस्वामिनः 'तपोभूमि' आश्रममाध्यमेन देवभूमिः गोवायां, आध्यात्मिकपरम्परां अन्वर्तयन्। सम्प्रति पीठाश्वरस्य कुशलनेतृत्वे पीठस्यास्य पताका उत्तोलिता वर्तते।

पीठेऽस्मिन् शिक्षा वैदिकसनातनसंस्कृतेरुपरि आधारिता वर्तते। पीठं छात्रेभ्यः वैदिकज्ञानं प्रदीयते। पीठेन 2018 तमे वर्षे प्रस्थापितः आवासीयविद्यालयः "अन्ताराष्ट्रियं सद्गुरुगुरुकुलम्" शैक्षिकशिक्षणेन सह छात्रेभ्यः भारतीयसांस्कृतिकमूल्यानां, वैदिकज्ञानस्य आत्मसात-करणे प्रचोदयति। पीठं सनातनवैदिकधर्मानुष्ठानाय महत्वं ददाति, धर्मशास्त्रं, योगशास्त्रं भारतीययोगविज्ञानं, वास्तुशास्त्रतत्वाधारित-निर्माणाध्ययनं, ज्योतिषशास्त्रं ग्रहाध्ययनसहितवैदिकज्योतिषं, तेन सह जन्मनक्षत्रं, राशिः आदिनां शिक्षणं प्रददाति। पीठस्य "स्वामी ब्रह्मानंदमहाविद्यालयः" गोवाराज्यस्य एक एव संस्कृतमहाविद्या-लयः वर्तते यत् संस्कृतं तथा अन्यशास्त्राणां पाठ्यक्रमेषु पदवीं प्रददाति।

**4. गीता धर्म मण्डलम् -**

श्रीमद्भगवद्गीतायाः विश्वात्मविचारं मनसिकृत्य सामान्यजन-मानसे गीतोऽपदेशान् समारोप्य विश्वचिन्तनाय जनजागृतिः वर्धनीया इति गीताधर्ममण्डलस्य मुख्येऽद्देश्यं भवति। संस्थेऽयं सामाजिक-सांस्कृतिकप्रगतये 94 वर्षेभ्यः प्रयतते। लोकमान्य तिलक् महोदयस्य 'गीतारहस्यं' इति पुस्तके ज्ञान-भक्ति-कर्माधारितजीवनस्य विचारः प्रचार्यते। 1924 तमे वर्षे प्रारब्धेऽयं संस्था भारतस्य भारतीयत्वं प्रतिपादयन्ती कर्मयोगं प्रधानीकृत्य जनानां सर्वाङ्गीणविकासेन सह राष्ट्रियभावम् उज्जागरयितुं प्रयतमाना वर्तते।

49 वर्षेभ्यः 'गीतादर्शनम्' इति सांस्कृतिकपत्रिकायाः अनुस्यूततया मुद्रणं प्रचलदस्ति। 30 वर्षेभ्यः गीताप्रवचनानि व्याख्यानकीर्तना-दिमाध्यमेन, दूरस्थशिक्षया गीताव्रती इति परीक्षायाः सञ्चालनं 1989 आरभ्य, ज्ञानेश्वरी प्रबोधः 1996 आरभ्य, श्री तुकोबराई गीताप्रवेशः 2000 आरभ्य प्रचलमानमस्ति। 1994 आरभ्य पूणेनगरे 95 स्थानेषु उचितगीताकक्ष्याः सञ्चाल्यन्ते। 'विविधगीता' इत्यादि अन्य 50 परियोजना अनुलक्ष्य पृथग्प्रकाशनविभागस्य स्थापनम्। भगवद्गीताध्ययनाय भारतीयसांस्कृतिकाध्ययनकेन्द्रत्वेन 'नलिनी-वसन्तभिडे' इति नाम्ना उच्चसन्दर्भयुतग्रन्थालयः। एतद्विहाय अन्यान्य विविधस्पर्धाःप्रतिवर्षं यथा गीताकण्ठस्थस्पर्धा, अध्यायकण्ठस्थस्पर्धा, शरद-ग्रीष्म ऋतयोः वर्गसञ्चालनं, गीतापाठशालाकक्ष्याः, संस्कृत-व्याकरणकक्ष्याः अपि सम्यक् सञ्चाल्यन्ते।

**5. महर्षि वेदव्यासप्रतिष्ठानम् - 'वेदाः सर्वहितार्थाय'**

**इतिहासः -**

ब्रह्मांडस्य प्राचीनसाहित्यं वैदिकविज्ञानेन संबद्धमस्ति। वेदाः भारतीयसंस्कृतेः आधारशिला भवन्ति। वेदाध्ययनं प्रोत्साहितुं एकमात्रोद्देश्येण सह, स्वामीजीवर्यैः 21 फरवरी 1990 तमे वर्षे आलंदी (पुणे), महाराष्ट्रराज्ये कतिचन आध्यात्मिकजनानां साहाय्येन महर्षि वेदव्यास प्रतिष्ठानस्य स्थापना कृता ("ट्रस्ट")। शिक्षाक्षेत्रेऽपि उल्लेखनीयं योगदानं करोति। पीठस्य वैदिकगुरुकुल-

**उद्देश्यानि -**

वेदानां, वेदाङ्गानां संस्कृतभाषायाश्च शिक्षणं प्रोत्साहनीयम् यच्च वैदिकसाहित्यस्य एकमात्रमाध्यमः वर्तते।

उपर्युक्तलक्ष्यानां प्राप्तये कतिचनगतिविधयः सूचीबद्धाः कृताः -

- वैदिकछात्रेभ्यः छात्रवृत्तिप्रदानम्।
- वैदिकविद्यालयेभ्यः अनुदानम्।
- युवावैदिकविद्वद्भ्यः वित्तीयसाहाय्यम्।
- मानित पुरातनवैदिकविदुषां कृते निवृत्तिराशिः।
- वैदिकाध्ययनं उन्नेतुं कार्यशालाः, सम्मेलनानि संगोष्ठ्यादयः।

**6. वेदप्रदीपः -** *"वेदानां संरक्षणार्थम् अनुसन्धानार्थश्च निधिः वेदप्रदिपः"* ।

संस्थेऽयं श्रीमन् बस्तीराम शारदा, सद्गुरुः श्री गंगेश्वरनाद-प्रतिष्ठानद्वारा (ट्रस्ट) संचाल्यते। संस्थायाः उद्देश्यं वेदानां संरक्षणाय शोधाय च व्यापकसंसाधनस्य निर्माणम्। परमपूज्यस्वामिनः गंगेश्वरनादवर्याणां आशीर्वादेन प्रेरणया च, श्री किसानलाल सारदावर्येण संस्थायाः स्थापना कृता।

प्रतिष्ठानमिदं माध्यमेनानेन विभिन्न गतिविधीन् संचालनं करोति।

- **वेदविद्यालयः -**

असौ महिलानां तथा सर्वविधजातीनां कृते वेदं शिक्षितुं एकैकः वेदविद्यालयः। सामान्यतया अत्र 20 तः 40 पर्यन्तं छात्राः अध्ययनं कुर्वन्तः प्राप्तुं शक्यन्ते।

गुरुगंगेश्वरानंदवेदविद्यालयप्रतिष्ठानस्य स्थापना 1984 तमे वर्षे गंगेश्वरानंदवेद- मंदिरं, त्र्यंबकमार्गः, नासिकनगरे ब्रम्हलीनसद्गुरुः श्री गंगेश्वरानंदस्वामिनां करकमलयोः समभवत्। 2000 तमे वर्षे वेदविद्यालयं महिरवानीग्रामे स्थानांतरितमकुर्वन्, यच्च अद्वितीयवन-सौंदर्ययुते एकांते च तिष्ठति। भारते विद्यालयोऽयं एक एव यश्च जाति-पंथ-धर्म -लिंगादि विभेदरहितेन छात्रेभ्यः वेदशिक्षां प्रददाति।

❖ **संस्कृतपाठशालासु संस्कृताध्यापनम् -**

पृथक् रूपेण संस्कृतपाठशालासु केवलं संस्कृताध्यापनेन शैक्षिक-प्रमुखधारया (Educational Mainstream) सह भेदः भवति। शिक्षाक्षेत्रे द्वैविध्यं नोचितम्, यदि च उभयोः व्यवस्था दृश्यते चेदपि तयोः मध्ये अत्यल्पः भेदः स्यात्। यद्यपि वैदिककालादारभ्य प्रायः चतुः सहस्रवर्षाणि यावत् संस्कृतशिक्षायाः प्रामुख्यमासीत् तथापि अन्तिमस्तरे संस्कृते सामकालिकविषयाणां समावेशाभावात् सामकालिकज्ञाने संस्कृतस्य समावेशाद्यभावाच्च उभयोः मध्ये भेदः समापन्नः। शनैः शनैः भारतीयप्रमुखशैक्षिकधारया संस्कृतशिक्षा पृथग्भूता। अतः उभयोः सामञ्जस्यमपेक्षितम्। यावत् शैक्षिकप्रमुख-धारायां सर्वेषु स्तरेषु अनिवार्यरूपेण व्यापकरूपेण च संस्कृताध्यापनव्यवस्था न भवति तावत् एताः पाठशालाः तिष्ठन्तु नाम। परं च तावद् पर्यन्तं एतासु पाठ शालास्वपि आधुनिकविषयाणां पाठनं सयात् येन उभयाः शिक्षाव्यवस्थयोः मध्ये भेदः न्यूनीकृतः

स्यात्। शैक्षिकप्रमुखधाराम् अतिरिच्य संस्कृतध्ययनार्थं पौर्णकालिक-संस्कृतपाठशालानामपेक्षया आंशकालिकसंस्कृतपाठयक्रमाणां (प्राज्ञ-विशारदादि) सुदृढव्यवस्थैव समीचीना प्रतिभाति ।

एवं हि सर्वास्वपि शिक्षानीतिषु भारतस्य सांस्कृतिकनिधिः, शिक्षायाम् आध्यात्मिकता, मूल्याधारितशिक्षा, शिक्षायां मानवीय-दृष्टिकोणः इत्यादीनामुल्लेखाः दृश्यन्ते। संस्कृतं विना भारतीयशिक्षा अपूर्णा भवति । तथाहि किमर्थं (Hyppocracy) कथं संस्कृतस्य उपेक्षा। स्वतन्त्ररूपेण संपूर्णरूपेण व्यापकरूपेण उन्मुक्तरूपेण संस्कृताध्यापनस्य व्यवस्था भारते भवेत्। संस्कृतपाठ्यक्रमे विविधता,आधुनिकता सामाजिकता च स्यात् तथैव संस्कृताध्यापकेषु उत्साहः उल्लासः गर्वम् च स्यात्। संस्कृताध्यापने भाषापक्षतः संस्कृतसम्भाषणाभ्यासस्योपरि संस्कृतसंवादिशीलतायाः विकास-स्योपरि सर्वाधिका श्रद्धा प्रदर्शनीया। तर्हि एव संस्कृतभाषा साहित्यं च आधुनिकभारतीयसमाजे, आन्तराष्ट्रियस्तरे च सार्वजनिकं समादरं, सजीवं प्रवाहं च प्राप्स्यतः। शिक्षायाः आवश्यकता, संस्कृतस्य अनिवार्यता। भारतस्य निधिः, संस्कृतस्य सन्निधिः।

❖ **व्यावहारिकरूपेण संस्कृतम्**

समग्रस्य शिक्षणस्य आधारभूतेषु अंशेषु संस्कृतम् अपि अन्यतमम् इत्येतत् चिन्तनं नितराम् अपूर्वम्। संस्कृतप्रीतितः पृथग्भूय तटस्थदृष्ट्या यदि चिन्त्यते, राष्ट्रं, संस्कृतिः, जीवनमूल्यानि, समाजोन्नतिः, सामरस्यम्, इत्यादिकं मनसि निधाय यदि पर्यालोच्यते, तर्हि संस्कृतस्य सामाजिकं व्यावहारिकञ्च महत्त्वं किञ्चित् अवगम्यते। संस्कृतं अङ्कप्राप्तेः सुलभोपायः, संस्कृतभाषा भाषासु अन्यतमा काचित् इत्येतादृशात् चिन्तनात् ऊर्ध्वम् अपि किञ्चित् अस्ति इति भासते। एतम् अंशं विस्तरेण यदि पश्यामः यत् कथं वा व्यक्तित्वविकासस्य आधारभूतत्वं सिद्ध्यति ? तत्र कारणद्वयं अस्ति। एकं तावत् सांस्कृतिकम्, अपरं च भाषाशास्त्रीयम् इति। तच्च स्पष्टीक्रियते – संस्कृतम् आश्रित्य तिष्ठति संस्कृतिः। वेदोप-निषद्गीतादयः संस्कृतभाषया एव रचिताः सन्ति। भरतवर्षस्य प्राचीनम् अत्यमूल्यं ज्ञानं विज्ञानं च एतया एव भाषया निरूपितम् अस्ति। इतिहास-पुराण-काव्य-दर्शनादिग्रन्थाः संस्कृभाषया एव रचिताः। बहुमूल्यि सुभाषितरत्नानि संस्कृतभाषया एव सङ्ग्रथितानि। भारतदेशस्य यत् यत् जीवनविषयकं श्रेष्ठत्वं तत्सर्वम् अनया एव भाषया सङ्गृहीतम्। एषा भाषा अस्माकं मानबिन्दुः गौरवास्पदं विषयः च। अतः एव उच्यते – संसकृस्य सांस्कृतिकं कारणत्वं विद्यते इति।

भाषाशास्त्रीयं कारणं तावत् एवम् – संस्कृतं सर्वासां भाषाणां जननी। भारतीयानां विविधप्रादेषिकभाषाणाम् उच्चारणशुद्धिः, अर्थगौरवत्वं, पद-लालित्यम्, इत्यादीनि भाषाकौशलानि संस्कृताभ्यासेनैव सम्यग्रूपेण प्राप्यन्ते। अलङ्कार-समास-छन्दः प्रभृतीनि शैली वैशिष्ट्यानि संस्कृतं विना सुरसानि न भवन्ति, यतः अस्माकं मातृभाषायाः संस्कृतस्य च रक्तसम्बन्धः अस्ति। भाषाप्रभुत्वं सुसंस्कृतस्य राष्ट्रस्य प्रथमं लक्षणम्। एतया दृष्ट्या चिन्त्यमाने, अवश्यं वक्तव्यं भवति यत् संसकृताध्ययनं प्राणपोषकम् एव इति।

आहारं विना जीवनं यथा न प्रचलति, तथा नूतनशब्दान् विना भाषाव्यवहारः अपि । नूतनशब्दानां निर्माणे स्वेच्छया व्यवहारः न युक्तः। यदि प्राज्ञाः शब्दान् निर्माय दद्युः तर्हि व्यवहारः सुकरः। भाषायाः व्यवहारयोग्यत्वं तदा एव सिद्ध्यति यदा च तद्भाषाभाषिणः सर्वान् भावान् लीलया प्रकाशयितुं शक्नुवन्ति। भावाः तदा सलीलं प्रकाशिताः भवन्ति यदा सर्वे पदार्थाः संस्कृतेन निर्देष्टुं शक्यन्ते। अतः संस्कृते समकालिकमानकशब्दानां निर्माणं त्वरया करणीयम्।

यः विषयः वर्तमानसमस्यानाम् उत्तरं ददाति सः विषयः एव सर्वैः जनैः स्वीकृतः, अधीतः, अनुसृतः च भवति। सः विषयः एव लोकप्रियः भवति। सः विषयः एव प्रासङ्गिकः भवति। विश्वस्य अद्यतनीषु प्रमुखासु समस्यासु वैश्विकतापवृद्धिः(Global warming), अधारण-क्षमोपभोगः (Unsustainable Consumption), सभ्यतागतसङ्घर्षः (Civilization Clash), दारिद्र्यम् (Poverty), आतङ्कवादः (Terrorism) इत्यादयः याः समस्याः सन्ति तासां निवारणे संस्कृतवाङ्मये विद्यमानं ज्ञानं महत्तमां भूमिकां निर्वोढुं शक्नोति। तदर्थं संस्कृतस्य शोधक्षेत्रे नवा दृष्टिः, नवं चिन्तनं, नवाः उपक्रमाः च भवेयुः। एतेषु विषयेषु विद्वांसः विशेषदृष्टिं निदध्युः।

एकम् उदाहरणं पश्याम तावत्। स्वामिना विवेकानन्देन बाल्ये मातुः लालना प्रेरणा च या प्राप्ता सा एव अश्वचालकं तं विश्वचालकं कृतवती। ए.पि.जे. अब्दुल्कलामस्य जीवने अपि एवमेव। दारिद्र्ये सत्यपि तेन गृहे पितुः मातुः च निष्ठा या दृष्टा, ये च अनुभवाः तेन लब्धाः, ते एव तदीयव्यक्तित्वनिर्माणस्य आधाराः जाताः। लुण्ठनं कर्तुं, मारयितुं, अन्यान् निष्करुणं पीडयितुं च प्रेरणा तादृशे कुटुम्बे परिसरे वा जन्म प्राप्तवतामेव भवति, येषु च कलह-लुण्ठन-मारण-पीडनादयः प्रबलतया दृश्येरन्।

अद्यत्वे अस्मद्देशस्य स्थितिः या दृश्यते तद्विषये किञ्चित् अस्माभिः अवधातव्यम्। विविधैः कारणैः गृहेषु वातावरणं पाश्चात्त्यीयं जायमानम् अस्ति खलु ? भोजनं, वस्त्रम्, चर्या, चिन्तनम्, आचाराः इत्यादिषु अस्मद्देशानुगता न्यूनतया एव दृश्यते। स्वतन्त्रतासंग्रामसमये विदेशीयवस्त्राणां बहिष्करणं, स्वदेशीयवस्तूनां निष्ठापूर्वकः उपयोगः, स्वभाषायाः उपयोगः इत्यादयः विचाराः तेषाम् आचरणं, तदर्थं कार्यक्रमाः इत्यादीनां परिणामः एव ब्रिटीशगमनस्य कारणं जातः। देशे स्वदेशविचारस्य प्रेरणा प्रवृद्धा। परन्तु स्वातन्त्र्यप्रास्यानन्तरं तादृशानां विचाराणां विषये अस्माकम् उदासीनता प्रवृद्धा। ततोऽपि अधिका उदासीनता दृष्टा आचाराणां विषये। देशीयाचाराणां, जीवनोद्देशस्य च विषये विद्यावन्तः प्रश्नान् एव उत्पादयन्ति। रक्षाबन्धनेन कः लाभः, स्वदेशीयवस्तूनां उपयोगः एव किमर्थं करणीयः, यतः मम आनुकूल्यं स्यात् तद्विषये अहम् अवदधामि, अन्येषां विषये किमर्थं मया चिन्तनीयम् इत्यादयः प्रश्नाः ! न केवलं तावत् स्वदेशविरुद्धं जीवनं स्वाभाविकं जायमानम् अस्ति अपि। 'अत्र भारते किमस्ति ? यु.के., यु.एस.ए... इत्यादिषु विदेशेषु कीदृशी स्थितिः अस्ति ! भारतम्.....धिक् एतम् !.... अत्र नैव स्थास्यामि' इति विचारः अपि स्वाभाविकः जायमानः अस्ति। विदेशीयभाषाणां अध्ययने या रुचिः समाजे अद्यत्वे आधिक्येन दृश्यते तस्य अपि कारणम् – एतादृशं चिन्तनं एव। विद्यावन्तः विदेशेषु उद्योगं प्राप्तुं, तत्रत्य जीवनम् अनुकर्तुं च अधिकतया इच्छन्ति।

संस्कृतं किमर्थं पठनीयम्, ततः किं प्रयोजनम् इत्यादीनां चिन्तनानां मूलम् अपि पूर्वोक्तः विचारः एव। कोऽपि जर्मनीयः किं चिन्तयति यत् जर्मनीभाषा किमर्थं मया पठनीया इति। चीनदेशीयः किं चर्चयति – चीनभाषा किमर्थम् आवश्यकी इति ? न खलु ! ! परन्तु अस्माकं देशे

बहवः पृच्छन्ति – किमर्थं संस्कृतं पठनीयम् इति। भारतीयत्वस्य विषये अस्मासु भारतीयेषु अभिमानः न्यूनः। केचन अल्पम् अभिमानं प्रकटयेयुः चेदपि आत्मविश्वासस्य न्यूनता दृश्यते तेष्वपि। अतः तदनुगुणम् आचरणं न कुर्वन्ति ते। तानि तत्त्वानि जीवने न पालयन्ति। केवलं कथने लेखने च अभिमानं द्शयन्ति, तावदेव।

संस्कृतिः भाषाद्वारा एव पुरुषान्तरं (generation) प्रति सङ्क्रामति। प्रसिद्धः भाषाशास्त्रकारः हेराल्ड् एफ्.शिफ्मेन्वर्यः (Harold F. Schiffman) वदति - "प्राचीनभारतस्य सांस्कृतिकी शिक्षा आदौ मौखिकाभ्यासं, ततः भाषायाः मान्त्रिकशक्तिं च केन्द्रीकृत्य स्थिता आसीत्। अग्रिमे काले संस्कृतेः अवस्थानाभि-वाहनादिभिः समस्याभिः सा बद्धा जाता ।

"(Cultural literacy in ancient India, thought first orally and focused on the magical power of language, became wrapped up in the issue of transmission and survival of culture. Linguistic culture and Language policy- Pg-153)".

संस्कृतिः बौद्धिकस्तरमात्रे न तिष्ठति। सा च जीवनस्य विषयः, पालनस्य विषयः, आचरणस्य विषयः च। संस्कृत्यनुगुण जीवनं करणीयम्। तदा स्वाभिमानः उद्बुद्धः भवेत्। आत्मविश्वासः चापि वर्धत। 'उद्धरेत् आत्मनात्मानम्' इति वचनं प्रसिद्धम् एवं ननु ? आत्मना एवं स्वस्य उद्धारः करणीयः। सःकेवलया बुद्ध्या अवगमनेन न भवति। जीवने तत्त्वस्य अनुसरणेन एवं भवति। आयुर्वेदः अस्माकम्। योगः अपि अस्माकम्। लोके अस्य विषये आदरः स्वीकृतिः च वर्धमाना अस्ति अपि। परन्तु अस्मासु कति जनाः स्वजीवने अस्य उपयोगं कुर्वन्ति? जीवनस्य भागररूपेण कति जनाः स्वीकृतवन्तः स्युः? विरलाः एव ननु ? एवमेव प्रचलति संस्कृतविषये अपि। वयं जीवने भारतीय भाषाणां योजनं यदि न कुर्याम तर्हि अस्माकं संस्कृतिरपि परिवृत्ता भविष्यति। 'नमस्ते, नमस्कारः, नमस्कार, वणक्कम्... 'इत्यादीनां प्रयोगाः न्यूनाः जाताः। 'हल्लो' 'हाय्' इत्यादयः प्रयोगाः प्रचुराः जाताः। गच्छता कालेन एतस्मात् एवं संस्कृतेः परिवर्तनम् अपि सम्भवति ! विचारस्य आचारस्य च परिवर्तनं जायते।.. जीवनस्य अभारतीयकरणं प्रवर्तते !!! एतस्यनिवारणं भवितुम् अर्हति - गृहतः एव । अतः एव गृहं गृहं प्रति संस्कृतम्। प्रतिगृहं यदि संस्कृतवातावरणं भवेत् तर्हि स्वाभाविकतया अस्माकं संस्कृतिरपि जागर्ति। अस्माकं जीवने परिवर्तनम् आगमिष्यति । अतः उच्यते - ' लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि'...।गृहेषु आबालवृद्धं सर्वेषु अपि जनेषु संस्कृतं जीवनस्य भागरूपेण आगच्छेत्। कश्चित् विचारः बाल्यावस्थायां यदि मनसि प्रविशति तर्हि आजीवनं सः विचारः आधारशिलावत् तिष्ठति। अतः संस्कृतमपि बाल्ये एव जीवनं प्रविशेत् । तत्तु भक्त्या विश्वासेन श्रद्धया च भवेत्। यदा बुद्धिविकासः प्राप्येत तदा कश्चित् बुद्ध्या संस्कृतमहत्त्वादिकम् अधिकतया अव- गच्छेदपि। परन्तु बुद्ध्या अवगमनस्य अनन्तरं तत् जीवने आनेतव्यं चेत् प्रयत्नः अधिकः आवश्यकः भवति। अतः बाल्ये एव , गृहतः एव संस्कृतपरिचयः सर्वेषां भारतीयानां भवेत्। मातृभाषया सह क्लेशं विना एतत् साध्यमपि। तदर्थं गृहे तादृशं वातावरणं निर्मातव्यम्। तत् कार्यम् अद्यतनपालकानां ज्येष्ठानां च कर्तव्यम् एवं कुर्याम चेत् स्वाभाविकतया संस्कृतं संस्कृतिश्च अस्माकं समाजे पुनरपि विलसेत्। विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च बुद्ध्या ग्रहणं सम्भवेत् , ततः शास्त्रचिन्तनादिकं प्रवर्तेत च। परन्तु श्रद्धानिर्माणं तु गृहे एव भवति। अतः गृहं गृहं प्रति संस्कृतं नयेम। एतदर्थमेव वयं गायामः - ' लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि'। गच्छाम ! वयं सम्मिलाम ! नयेम संस्कृतं पुनरपि गृहं गृहं प्रति ।

**❖ उपसंहारः -**

भारतीयज्ञानपरम्परायाः संरक्षणे याः संस्थाः रतास्सन्ति तासां वैदिकसाहित्यस्य, संस्कृतसाहित्यस्य च विषये बलमधिकं वर्तते इति अध्ययनेन स्पष्टं भवति। संस्कृतभाषायाः उपरि सम्प्रति बहुधा संवर्धनं वेगेन जायमानं विद्यते। चतुर्वेदानां शिक्षणेन, वैदिकजनानां सम्मेलनेन, मठादिभिः वेदपाठशालानां सञ्चालनेन, अनुसन्धान-संस्थाभिः वैदिकसाहित्ये अनुसन्धानेन च वैदिकसंस्कृतसाहित्यस्य संरक्षणं संवर्धनञ्च क्रियमाणं वर्तते। भारतीयं ज्ञानस्य महत्त्वं विश्वस्तरे प्रचार्यमाणः वर्तते। "वेदोऽखिलो धर्ममूलम्" इति उक्त्यनुगुणं वैदिकसंस्कृतसाहित्यस्य संरक्षणेन भारतीयज्ञनपरम्परायाः संवर्धनम् अवश्यं सम्भवतीति नात्र संशयः।

**❖ सन्दर्भः -**

*सम्भाषणसन्देशः*, संस्कृतभारती, बेंगळूरु।

योगेन्द्रमिश्रः,1981, *वैशाली दिग्दर्शन* वैशालीसङ्घः।

कमलकान्तमिश्रः, 1997, *भारते संस्कृताध्ययनम्,* राष्ट्रियसंस्कृत-संस्थानम्, नवदेहली।

अवधेश.के.सिंहः, कपिलकपूर, 2005, *भारतीयज्ञानपरम्परा-प्रथमभागः*, भारतीय उच्चाध्ययनसंस्था, नवदेहली।

अवधेश.के.सिंहः, कपिल कपूर, 2005, *भारतीयज्ञानपरम्परा-द्वितीय-भागः*, भारतीय उच्चाध्ययनसंस्था, नवदेहली।

राधावल्लभत्रिपाठी, 2012, *षष्ठ्यब्दसंस्कृतम्,* राष्ट्रियसंस्कृत-संस्थानम्, नवदेहली।

**❖ अन्तर्जालपुटानि -**

https://en.wikipedia.org/wiki/

https://ngodarpan.gov.in/

https://ngosindia.com/

www.ngosource.org

https://iksindia.org/